14
चतुर्दशः पाठः


# देवनदी गंगा

## शतृ, शानच् प्रत्यय

भारतदेशः पृथिव्याः स्वर्गः कथ्यते। अत्र हिमालयः पर्वतः पृथिव्याः मानदण्डः इव स्थितः। हिमालयात् गंगा–सदृशाः नद्यः प्रभवन्ति। एतासां नदीनां पीयूष–तुल्यं जलं भारतस्य भूमिं सिञ्चति। एताः सरिताः भारतस्य भूमिं शस्यश्यामलां करणाय साधनभूताः सन्ति। गंगा सर्वासु नदीषु पवित्रतमा वर्तते। एतासां सर्वासां नदीनां जलेषु गंगायाः जलं पवित्रतमं मन्यते।

आदौ गंगाजलं मुरारिचरणनखैः निसृतं मन्यते, तदनन्तरं शिवस्य जटासु **प्रवहमानं** सर्वलोकानां पापानि परिहरति। जनाः श्रद्धया तां 'गंगामाता' इति कथयन्ति।

गंगायाः तटे अनेकानि तीर्थानि सन्ति यथा ऋषिकेशः, हरिद्वारः, प्रयागः, काशी, इत्यादयः। धार्मिकाः जनाः एतेषु तीर्थेषु गंगाजले स्नात्वा पुण्यसञ्चयं कुर्वन्ति। सर्वेषु धार्मिक–कृत्येषु गंगाजलस्य प्रयोगः भवति। गंगाजलं कदापि विकृतिं न लभते इत्यस्ति अस्य वैशिष्ट्यम्।



गंगायाः जाह्नवी, भागीरथी, सुरसरिता इति बहूनि नामानि सन्ति। एवं श्रूयते यत् महाराजा भगीरथः स्वपूर्वजानाम् उद्धाराय गंगां स्वर्गात् पृथिव्याम् आनयत्। इयं महादेवजटासु **प्रवहन्ती** धरायाम् अवतीर्णा अभवत्। भौगोलिकसंगमनाम्नि स्थाने गंगासागरे समायाति। गंगोत्तरी गंगासागरसंगमश्च पवित्रौ तीर्थौ स्तः।

गंगा ग्रीष्मकालेऽपि जलपूर्णा तिष्ठति। प्रसिद्धा यमुनानदी प्रयागे गंगां संगच्छते। अत्र गंगायाः शुभ्रं यमुनायाश्च नीलजलं सम्मिलति। बहुमनोहरं दृश्यम् एतत्। गंगायाः कारणेनैव देशः धन-धान्येन समृद्धोऽस्ति। सत्यमेवेयम् अस्माकं मातृवत् हितं करोति।

## शब्दार्थाः (WORD MEANINGS)

| | | |
|---|---|---|
| पृथिव्याः | पृथ्वी का | Of earth |
| सदृशाः | समान, जैसी | Same as |
| पीयूषतुल्यं | अमृत के समान | Like nectar |
| शस्यश्यामलाम् | हरी–भरी | Full of green |
| निसृता | निकली हुई | Came out |
| साधनभूताः | साधन स्वरूप | Full of sufficient |
| तदनन्तरम् | उसके बाद | After then |
| श्रद्धया | श्रद्धा से | With respect |
| प्रवहमानम् | बहती हुई | Flowing |
| तीर्थेषु | तीर्थों में | In holy places |
| स्नात्वा | स्नान करके | After bathing |
| कृत्येषु | कार्यों में | In works |
| विकृतम् | अशुद्धता | Impurity |
| वैशिष्ट्यम् | विशेषता | Importance |
| मातृवत् | माता के समान | Same as mother |

## क्रिया (VERB)

| | | | |
|---|---|---|---|
| सिञ्चति | (सिञ्च) | सींचती है | Watering |
| कथ्यते | (कथ्) | कहा जाता है | Is said |
| तिष्ठन्ति | (स्था) | स्थित हैं | Stand |
| मन्यते | (मन्) | मानी जाती है | Is believed |
| परिहरति | (परि + हृ) | दूर करती है, हरण करती है | Takes away |

3. संधि कीजिए (Join words) –

(क) तत् + अनन्तरम् = तदनन्तरम्

(ख) कदा + अपि = कदापि

(ग) इति + अस्ति = इत्यस्ति

(घ) कारणेन + एव = कारणेनैव

(ङ) समृद्धो + अस्ति = समृद्धोऽस्ति

4. निम्नलिखित शब्दों में धातु तथा प्रत्यय का उल्लेख कीजिए (Write root and suffix in the following words) –

| शब्द | धातु | प्रत्यय |
|---|---|---|
| (क) पश्यत् | दृश् | शतृ |
| (ख) लिखत् | लिख् | शतृ |
| (ग) प्रवहमानम् | प्र + वह् | शानच् |
| (घ) लभमान | लभ् | शानच् |
| (ङ) विद्यमान | विद् + क्यप् | शानच् |